तस्य गोत्रापत्यम् कुञ्जा° चफञ्। ब्राह्मायन तद्गोत्रापत्ये पुंस्त्री°। ७भौत्यमनोः पुत्रभेदे मार्कपु° १००अ°। ८रोगभेदे "अभ्यभिष्यन्दिगुर्वामसेवनान्निचयं गतः। करोति ग्रन्थिवच्छोथं दोषो वङ्क्षणसन्धिषु। ज्वरशूलाङ्गसादाढ्यं तं ब्रध्नमिति निर्दिशेत्" माधवनि°

ब्रध्नश्व पु° नृपभेदे भा°व° ९८अ°।

ब्रह्मकन्यका स्त्री ६त°। १सरस्वत्यां त्रिका° (वामनहाटी) २ब्राह्म्यां राजनि°। [७०२९अ°। २ईश्वरार्पितकर्मफलेत्रि°

ब्रह्मकर्मन् न° ब्रह्मविहितं कर्म°। १वेदविहिते कर्मणि भा°

ब्र(ब्र)ह्मकर्मसमाधि पु°ब्रह्मणि कर्मणां समाधिः "ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्। ब्रह्मैव तेन गन्तव्यम् ब्रह्मकर्मसमाधिना" गीतोक्ते सर्वकर्मणां कर्त्राद्यङ्गजातस्य ब्रह्मरूपेण चिन्तने।

ब्र(ब्र)ह्मकुण्ड न° ब्रह्मनिर्मितं कुण्डम् शा° त°। सरोवरभेदे तदाविर्भवकथा।

"पाण्डुनाथस्योत्तरस्यां ब्रह्मकुण्डाह्वयं सरः। ब्रह्मणा निर्मितं पूर्वं स्नानाय स्वर्गवासिनाम्। आयामेन शतव्यामं विस्तीर्णेन तदर्द्धकम्। सर्वपापहरं पुण्यं देवलोकात् समागतम्" तत्र स्नानमन्त्रः। "कमण्डलु समुद्भूतः ब्रह्मकुण्डाम्भतत्त्व!। हर मे सर्वपापानि पुण्यं स्वर्गञ्च साधय। इत्यनेन तु मन्त्रेण स्नायात् तस्मिन् सरोजले। पाण्डुनाथञ्च संपूज्य विष्णुसायुज्यमाप्नुयात्। ब्रह्मकुण्डजले स्नात्वा पूजयित्वा उमापतिम्। ब्रह्मकूटं समारुह्य मुक्तिमेवाप्नुयान्नरः" कालिकापु°८१ अ°।

ब्र(ब्र)ह्मकूट पु° पर्वतभेदे ब्रह्मकुण्डशब्दे दृश्यम्।

ब्र(ब्र)ह्मकूर्च न° "अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः। पञ्चगव्यं पिबेत् प्रातः ब्र(ब्र)ह्मकूर्चमिति स्मृतम्" इत्युक्ते १पञ्चगव्यपानरूपे व्रतभेदे। २कुशोदकसहित पञ्चगव्ये च नारसिंहपु° "पञ्चगव्येन देवेशं यः स्नापयति भक्तितः। ब्रह्मकूर्चविधानेन विष्णुलोके महीयते" "ब्र(ब्र)ह्मकूर्चविधानेन कुशोदकयुतेन" देव° प्र°त°रघु° प्रायश्चित्ताङ्ग ब्र(ब्र)ह्मकूर्चप्रमाणादि तुलादानादिपद्धतौ २२६१पृ° अस्माभिर्दर्शितम्।

ब्र(ब्र)ह्मकृत् त्रि°ब्र(ब्र)ह्म तपः करोति कृ-क्विप्। १तपःकर्त्तरि २विष्णौ पु° "ब्र(ब्र)ह्मण्यो ब्र(ब्र)ह्मकृत् ब्रह्मा" विष्णुस°

ब्र(ब्र)ह्मकृत त्रि° ३त°। ब्रह्मणा कृते। ततः शुभ्रा°अपत्ये ढक्। ब्राह्मकृतेय तदपत्ये पुंस्त्री°। [राजनि°।

ब्र(ब्र)ह्मकोशी पु° ब्र(ब्र)ह्मणः कोशीव। अजमोदायाम्

ब्र(ब्र)ह्मगर्भा स्त्री ब्र(ब्र)ह्मेव गर्भोऽस्य। आदित्यभक्तायां राजनि°।

ब्र(ब्र)ह्मगार्ग्य पु° ऋषिभेदे हरिवं° १५९ अ°।

ब्र(ब्र)ह्मगिरि पु° कामाख्यानिलयपूर्वस्यां स्थिते गिरिभेदे "ततस्तु नीलकूटाख्यं कामाख्यानिलयं परम्। तत्पूर्वभागे वसति ब्रह्मा ब्रह्मगिरिः पुनः" कालिकापु°८१अ°

ब्र(ब्र)ह्मगीता स्त्री ६त°। भा° आनु° ३५ अ° दर्शितायां ब्रह्मणा कथितायां अनुशासनरूपगाथायाम्।

"अत्र गाथाः पुरा गीताः कीर्त्तयन्ति पुराविदः। सृष्ट्वा द्विजातीन् धाता हि यथापूर्वं समादधत्। न चान्यदिह कर्त्तव्यं किञ्चिदूर्द्ध्वं यथाविधि। गुप्तो गोपायते ब्रह्म श्रेयो वस्तेन शोभनम्। स्वमेव कुर्वतां कर्म श्रीर्वो ब्राह्मी भविष्यति। प्रमाणं सर्वभूतानां प्रग्रहाश्च भविष्यथ। न शौद्रं कर्म कर्त्तव्यं ब्राह्मणेन विपश्चिता। शौद्रं हि कुर्वतः कर्म धर्मः समुपरुध्यते। श्रीश्च बुद्धिश्च तेजश्च विभूतिश्च प्रतापिनी। स्वाध्यायं चैव माहात्म्यं विपुलं प्रतिपत्स्यथ। हुत्वा चाहवनीयस्थं महाभाग्ये प्रतिष्ठिताः। अग्रभोज्याः प्रसूतानां श्रिया ब्राह्म्याऽनुकल्पिताः। श्रद्धया परया युक्ता ह्यनभिद्रोहलब्धया। दमस्वाध्यायनिरताः सर्वान् कामानवाप्स्यथ। यच्चैव मानुषे लोके यच्च देवेषु किञ्चन। सर्वं तु तपसा साध्यं ज्ञानेन नियमेन च। इत्येवं ब्रह्मगीतास्ते समाख्याता मयाऽनघ"।

ब्र(ब्र)ह्मग्रन्थि पु° यज्ञोपवीतस्य ग्रन्थिभेदे

ब्र(ब्र)ह्मघातक पु° ब्रह्माणं विप्रं हन्ति हन-ण्वुल्। १ब्रह्महत्याकारके "पङ्क्तिभेदी वृथा पाकी नित्यं ब्राह्मणनिन्दकः। आदेशी वेदविक्रेता पञ्चैते ब्रह्मघातकाः"। व्यासोक्ते पारिभाषिके २पापभेदयुक्ते त्रि°। ब्रह्मघातोऽस्त्यस्यां "अत्रणेन ठन्। द्वादश्यां भक्षणे ब्रह्महत्यापापयुतायां पूतिकायां "पूतिका ब्रह्मघातिका" ति°त°।

ब्र(ब्र)ह्मघोष पु° ६त°। वेदध्वनौ।

ब्र(ब्र)ह्मघ्न त्रि° ब्रह्माणं ब्राह्मणं हन्ति हन-क। ब्रह्महत्याकारके "ब्रह्मघ्नमपि चण्डालं कं पतन्तं पुनीमहे" म° त°। स्त्रियां ङीप्।

ब्र(ब्र)ह्मचक्र न° ब्रह्मनिर्मितं चक्रम्। १कार्य्यकरणात्मके संसाररूपे चक्रे। "सर्वाजीवे सर्वसंस्थे बृहन्ते अस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे" श्वेताश्वतरोप°। रुद्रजामलोक्ते २दीक्षोपयोगिचक्रभेदे च।